श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीनारायणयतीन्द्रमहादेशिकैरनुगृहीतम्

# ॥ श्रीकृष्ण मङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकृष्ण मङ्गळाशासनं ॥

गीतोपनिषदाचार्ये मम यामुनदेशिके।
यतीन्द्रे चागमान्तार्ये भक्तिर्भद्राय वर्धताम्॥ १ ॥

सच्छिष्याद्युपदेश्याय देहात्मभ्रमघातिने।
आदिष्टकर्मयोगाय गीताचार्याय मङ्गळम्॥ २ ॥

उक्त सर्वात्मसाम्याय जीव योग विधायिने।
साक्षिणे ज्ञानिनि श्रेष्ठक्रियावेद्याय मङ्गळम्॥ ३ ॥

साङ्गभक्ति समादेष्ट्रे निस्सीमगुण भूतये।
सुचक्षुर्दानदक्षाय क्रमोपास्याय मङ्गळम्॥ ४ ॥

गीतक्षेत्रज्ञतत्त्वाय त्रिगुणद्रव्यवादिने।
चेतनाचेतनेशाय शास्त्रवेद्याय मङ्गळम्॥ ५ ॥

त्रेधाविभक्त धर्माय सारोपायप्रदर्शिने।
भक्तिप्रपत्तिलभ्याय गीताचार्याय मङ्गळम्॥ ६ ॥

नारायणेन मुनिना कृतं गीतार्य मङ्गळम्।
आशास्तेऽनुदिनं सोऽपि भवेन्मङ्गळभाजनम्॥ ७ ॥

॥ इति श्रीकृष्ण मङ्गळाशासनं समाप्तम् ॥

www.prapatti.com